श्री सुब्रह्मण्य स्तोत्रं

श्री सुब्रह्मण्य स्तोत्रं

आदित्यविष्णुविघ्नेशरुद्रब्रह्ममरुद्गणाः |
लोकपालाः सर्वदेवाः चराचरमिदं जगत् || 1 ||

सर्वं त्वमेव ब्रह्मैव अजमक्षरमद्वयं |
अप्रमेयं महाशांतं अचलं निर्विकारकं || 2 ||

निरालंबं निराभासं सत्तामात्रमगोचरं |
एवं त्वां मेधया बुद्ध्या सदा पश्यंति सूरयः || 3 ||

एवमज्ञानगाढांधतमोपहतचेतसः |
न पश्यंति तथा मूढाः सदा दुर्गति हेतवे || 4 ||

विष्ण्वादीनि स्वरूपाणि लीलालोकविडंबनं |
कर्तुमुद्यम्य रूपाणि विविधानि भवंति च || 5 ||

तत्तदुक्ताः कथाः सम्यक् नित्यसद्गतिप्राप्तये |
भक्त्या श्रुत्वा पठित्वा च दृष्ट्या संपूज्य श्रद्धया || 6 ||

सर्वान्कामानवाप्नोति भवदाराधनात्खलु |
मम पूजामनुग्राह्य सुप्रसीद भवानघ || 7 ||

चपलं मन्मथवशममर्यादमसूयकं |
वंचकं दुःखजनकं पापिष्ठं पाहि मां प्रभो || 8 ||

सुब्रह्मण्यस्तोत्रमिदं ये पठंति द्विजोत्तमाः |
ते सर्वे मुक्तिमायांति सुब्रह्मण्य प्रसादतः || 9 ||